षोडशः पाठः १६

कर्तव्यपालनम्

चन्द्रगुप्तः मगधदेशस्य नृपः आसीत्। तस्य मन्त्री चाणक्यः तपोधनः राजतन्त्रज्ञः च आसीत्। मन्त्री अपि स एकस्मिन् उटजे निवसति स्म। वैराग्यभावनया सः पूर्णः आसीत्। एकदा नृपेण चाणक्याय कम्बलाः समर्पिताः। तान् कम्बलान् दरिद्रेभ्यः दातुं नृपः सूचितवान्।



चाणक्यस्य उटजं नगराद् बहिः आसीत्। केचन चौराः कम्बलान् अपहर्तुं चिन्तितवन्तः। ते एकदा रात्रौ चाणक्यस्य उटजं प्राविशन्। मध्यरात्रिसमये शीतकाले अतीव शैत्यम् आसीत्। तथापि चाणक्यः जीर्णकम्बलेन सह सुप्तः आसीत् । पार्श्वे नूतनकम्बलानां राशिः एव आसीत्। चौराणाम् आश्चर्यं जातं यत् पार्श्वे नूतनकम्बलानां राशिरेवास्ति तथापि चाणक्यः जीर्णकम्बलं धृत्वा शेते। चौराः चौर्यं न अकुर्वन् ते चाणक्यं प्रबोधितवन्तः। चौराः– ''महोदय! तव पार्श्वे नूतनकम्बलानां राशिः अस्ति तथापि जीर्णकम्बलं धृत्वा किमर्थं शयनं करोति?'' इत्यपृच्छन्। चाणक्यः उक्तवान् ''कम्बलाः नृपेण दत्ताः। ते दरिद्रेभ्यः दातव्याः। अतः श्वः प्रभाते वितरणं करिष्यामि। तेषां उपयोगं कर्तुं मम न अधिकारः। अहं विरक्तः सदा तृप्तः इति।''



इदं श्रुत्वा चौराः लज्जीभूताः। अन्येषां द्रव्यस्य उपयोगेन अधर्मः भवति इति चाणकस्य विचारः अस्ति। वयं जीवने प्रतिदिनम् अन्यस्य द्रव्यमेव अपहरामः। अधर्मं कुर्मः। पापस्य सङ्ग्रहः भवति इति चिन्तयित्वा ते चाणक्यमहामात्यात् क्षमां प्रार्थितवन्तः। ततः ते चौरकार्यं त्यक्तवन्तः।

मातृवत्परदारेषु, परद्रव्येषु लोष्ठवत्।
आत्मवत् सर्वभूतेषु, यः पश्यति स पण्डितः।।

शब्दार्थः

शब्दः	सरलार्थः	हिन्दी अर्थ
नृपः	भूपतिः	राजा
तपोधनः	तपस्वी	तपस्वी
उटजे	कुट्याम्	कुटिया में
वैराग्यम्	निसङ्गता	विरक्ति
अपहर्तुम्	चोरयितुम्	चोरी करने के लिए
शैत्यं	शीतलता	सर्दी
कटे	कटस्य उपरि	चटाई पर
सुप्तः	शयानः	सोया हुआ
प्रबोधितवन्तः	जागरणं कृतवन्तः	जगाकर
द्रव्यम्	धनं	धन
अपहरामः	चोरयामः	चुराते हैं

अभ्यासः

मौखिकप्रश्नाः

१. **अधोलिखितानां पदानाम् उच्चारणं कुरुत -**

राजतन्त्रज्ञः	दरिद्रेभ्यः	उटजं	अपहर्तुं	प्रबोधितवन्तः
राशिरेवास्ति	दातव्याः	इत्यपृच्छन्	महामात्याः	चाणक्याय
कम्बलाः	मातृवत्	लोष्ठवत्	त्यक्तवन्तः	

२. **अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत –**

(क) मगधदेशस्य नृपः कः आसीत् ?

(ख) एकस्मिन् उटजे कः निवसति स्म ?

(ग) चाणकस्य उटजं के प्राविशन् ?

(घ) चौराः केन कारणेन आश्चर्यचकिताः अभवन् ?

(ङ) परद्रव्यं कीदृशं भवति ?

लिखितप्रश्नाः

१. **अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत –**

(क) चन्द्रगुप्तस्य मन्त्री कः आसीत् ?

(ख) एकदा नृपेण चाणक्याय किं समर्पितम् ?

(ग) के कम्बलान् अपहर्तुं चिन्तितवन्तः ?

(घ) ''तेषां उपयोगं कर्तुं मम न अधिकारः'' इति कः कथयति ?

३. **अधोलिखितानां प्रश्नानां उत्तराणि एकवाक्येन लिखत –**

(क) मन्त्री कुत्र निवसति स्म ?

(ख) नृपः कम्बलान् केभ्यः दातुं सूचितवान् ?

(ग) कम्बलान् अपहर्तुं के चिन्तितवन्तः ?

(घ) चौराः चाणक्यं किम् अपृच्छन् ?

४. **निम्नलिखितवाक्यानि निर्देशानुसारं काल (लकारं) परिवर्तनं कृत्वा पुनः लिखत –**

उदाहरणम्– चन्द्रगुप्तः मगधदेशस्य नृपः अस्ति। (लङ् लकार)

चन्द्रगुप्तः मगधदेशस्य नृपः आसीत्।

(क) मन्त्री एकस्मिन् उटजे निवसति। (लङ् लकार)

....

(ख) प्रभाते वितरणं करोमि। (लृट् लकार)

....

(ग) अन्येषां द्रव्यस्य उपयोगेन अधर्मः भविष्यति। (लट् लकार)

....

(घ) अन्यस्य द्रव्यं न अपहरिष्यामः। (लट् लकार)

....

(ङ) चाणक्यः कम्बलं विना निद्रां करिष्यति। (लट् लकार)

....

५. **निम्नपदान् स्वीकृत्य वाक्यरचनां कुरुत -**

उजटे .... ।

निवसति .... ।

भावनया .... ।

समर्पिताः .... ।

दातुम् .... ।

अपहर्त्तुम् .... ।

प्रबोधितः .... ।

स्वः .... ।

प्रतिदिनम् .... ।

योग्यता-विस्तारः

चाणकस्य विषये अन्या कथा



एकदा यवनसेनानायकः चाणकस्य उटजे आगच्छत्। रात्रिकालः आसीत्। चाणक्यः किञ्चिद् राज्यकार्यं करोति स्म। सः उत्थाय प्रथमं दीपकं निर्वापितं तदनन्तरं सः अन्यं दीपकं प्रज्वाल्य सेनानायकेन सह वार्तालापम् अकरोत्। सेनानायकः तस्य कारणम् अपृच्छत्। चाणक्यः अवदत् - ''महोदय! पुरा अहं राज्यकार्यं सम्पादयामि स्म। अतः मया राज्यतैलस्य उपयोगं कृतम्। अधुना अहं भवता सह वार्तालापाय राज्यतैलस्य उपयोगं कर्तुं न शक्नोमि। अहो! इदृशः आसीत् महामन्त्री चाणक्यः।